# श्रीमद् भागवत रसिक कुटुंब

## द्वादश ज्योतिर्लिंग स्तोत्र

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# द्वादश ज्योतिर्लिंग स्तोत्र

## लघु स्तोत्रम्

सौराष्ट्रे सोमनाधंच श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालं ॐकारेत्वमामलेश्वरम् ॥

पल्यां वैद्यनाधंच ढाकिन्यां भीम शंकरम् ।
सेतुबंधेतु रामेशं नागेशं दारुकावने ॥

वारणाश्यांतु विश्वेशं त्रयंबकं गौतमीतटे ।
हिमालयेतु केदारं घृष्णेशंतु विशालके ॥

एतानि ज्योतिर्लिंगानि सायं प्रातः पठेन्नरः ।
सप्त जन्म कृतं पापं स्मरणेन विनश्यति ॥

## अथ द्वादशज्योतिर्लिंगस्तोत्रम्

सौराष्ट्रदेशे विशदेऽतिरम्ये,
ज्योतिर्मयं(ञ्) चन्द्रकलावतंसम्।
भक्तिप्रदानाय कृपावतीर्णं(न्),
तं(म्) सोमनाथं(म्) शरणं(म्) प्रपद्ये ॥ 1 ॥

श्रीशैलशृङ्गे विबुधातिसङ्गे,
तुलाद्रितुङ्गेऽपि मुदा वसन्तम्।
तमर्जुनं(म्) मल्लिकपूर्वमेकं(न्),
नमामि संसारसमुद्रसेतुम् ॥ 2 ॥

अवन्तिकायां(म्) विहितावतारं(म्),
मुक्तिप्रदानाय च सज्जनानाम्।
अकालमृत्योः(फ्) परिरक्षणार्थं(म्),
वन्दे महाकालमहासुरेशम् ॥ 3 ॥

कावेरिकानर्मदयोः(फ्) पवित्रे,
समागमे सज्जनतारणाय।
सदैवमान्धातृपुरे वसन्तम्,
ओङ्कारमीशं(म्) शिवमेकमीडे ॥ 4 ॥

पूर्वोत्तरे प्रज्वलिकानिधाने,
सदा वसन्तं(ङ्) गिरिजासमेतम्।
सुरासुराराधितपादपद्मं(म्),
श्रीवैद्यनाथं तमहं(न्) नमामि ॥ 5 ॥

याम्ये सदङ्गे नगरेऽतिरम्ये,
विभूषिताङ्गं(म्) विविधैश्च भोगैः।
सद्भक्तिमुक्तिप्रदमीशमेकं(म्),
श्रीनागनाथं(म्) शरणं(म्) प्रपद्ये ॥ 6 ॥

महाद्रिपार्श्वे च तटे रमन्तं(म्),
सम्पूज्यमानं(म्) सततं(म्) मुनीन्द्रैः।
सुरासुरैर्यक्ष महोरगाढ्यैः(ख्),
केदारमीशं(म्) शिवमेकमीडे ॥ 7 ॥

सह्याद्रिशीर्षे विमले वसन्तं(ङ्),
गोदावरीतीरपवित्रदेशे।
यद्धर्शनात्पातकमाशु नाशं(म्),
प्रयाति तं(न्) त्र्यम्बकमीशमीडे ॥ 8 ॥

सुताम्रपर्णीजलराशियोगे,
निबध्य सेतुं(म्) विशिखैरसंख्यैः।
श्रीरामचन्द्रेण समर्पितं(न्) तं(म्),
रामेश्वराख्यं(न्) नियतं(न्) नमामि ॥ 9 ॥

यं(ण्) डाकिनिशाकिनिकासमाजे,
निषेव्यमाणं(म्) पिशिताशनैश्च।
सदैव भीमादिपदप्रसिद्दं(न्),
तं(म्) शङ्करं(म्) भक्तहितं(न्) नमामि ॥10॥

सानन्दमानन्दवने वसन्तम्,
आनन्दकन्दं(म्) हतपापवृन्दम्।
वाराणसीनाथमनाथनाथं(म्),
श्रीविश्वनाथं(म्) शरणं(म्) प्रपद्ये ॥11॥

इलापुरे रम्यविशालकेऽस्मिन्,
समुल्लसन्तं(ञ्) च जगद्वरेण्यम्।
वन्दे महोदारतरस्वभावं(ङ्),
घृष्णेश्वराख्यं(म्) शरणम् प्रपद्ये ॥12॥

ज्योतिर्मयद्वादशलिङ्गकानां(म्),
शिवात्मनां(म्) प्रोक्तमिदं(ङ्) क्रमेण।
स्तोत्रं(म्) पठित्वा मनुजोऽतिभक्त्या,
फलं(न्) तदालोक्य निजं(म्) भजेच्च ॥13॥

इति श्रीमद्शङ्कराचार्यविरचितं द्वादशज्योतिर्लिङ्गस्तोत्रं सम्पूर्णम्